Nyayakalapasangraha

श्रीः

श्रीभगवद्रामानुजविरचिते

न्यायकलापसङ्ग्रहः

प्रथमोऽध्यायः

प्रथम पादः

Sloka

**शास्त्रावतारः शास्त्रावतारः -१

प्रणम्य रामानुज संयमीश्वरं प्रबोधहेतुं हृदयाम्बुजन्मनः ।

करोमि तद्दर्शनमार्गगोचरं शारीरकन्यायकलापसंग्रहम् ।। १ ।।

**शास्त्रावतारः शास्त्रावतारः -२

प्रमाणता तत्प्रतियोगिभङ्गः संराधनं तस्य फलोपभोगः ।

एतानि सम्यक् परिचिन्तितानि शास्त्रे त्विहाध्याय चतुष्टयेन ।। २ ।।

**शास्त्रावतारः शास्त्रावतारः -३

अस्पष्टतरम् अस्पष्टं स्पष्टं छायानुसारि च ।

जीवप्रधानयोः आदौ वाक्यजातं विचिन्तितम् ।। ३ ।।

**शास्त्रावतारः शास्त्रावतारः -४

स्मृतिन्यायाविरोधश्च परपक्षपराहतिः ।

कार्यता वियदादीनां अक्षादेश्च द्वितीयतः ।। ४।।

**शास्त्रावतारः शास्त्रावतारः -५

सदोषत्वं अदोषत्वं जीवस्य च परस्य च ।

तृतीयेन परोपास्तिः इतिकर्तव्यताऽपि च ।। ५ ।।

**शास्त्रावतारः शास्त्रावतारः -६

उपास्त्यनुष्ठानविधा गत्युपक्रम एव च ।

गतिमार्ग प्रकारश्च फलं चापि चतुर्थतः ।। ६ ।।

प्रथम पादः

*1.1.1 जिज्ञासाधिकरणम्

कार्ये हि वृद्धव्यवहार सिद्धो व्युत्पततिभावो वचसां, न सिद्धे ।
इत्येतदुत्सारितवान् प्रसिद्धेः सिद्धेऽपि बालप्रतिबोधनेषु ।। ७ ।।

*1.1.2 जन्माद्यधिकरणम्

भेदप्रसक्तेरनुभूत्यभावात् विशेषणं वाऽप्युपलक्षणं वा ।
जन्माद्यशक्यप्रतिपादनं यत् स्यात्तन्निरासोऽप्युभयत्व शक्तेः ।। ८ ।।

*1.1.3 शास्त्रयोनित्वाधिकरणम्

कार्यत्वतः सावयवत्त्व सिद्धात् कर्ता च संसिद्ध्यति कारणं च ।
इत्येतदुत्सारितवान् प्रदूष्य शास्त्रैकगम्यत्व समर्थनेन ।। ९ ।।

*1.1.4 समन्वयाधिकरणम्

प्रयोजनं ब्रह्मणि नैव लब्धं सिद्धे प्रवृत्तिस्त्वथवा निवृत्तिः ।
इत्यप्रमात्वं हि विशङ्क्य नुन्नं स्वतः फलत्वेन परस्य पुंसः ।। १० ।।

*1.1.4 समन्वयाधिकरणम्

व्युत्पत्त्यभावात् प्रतिपत्तिदौस्स्थ्यात् अन्येन सिद्धेरफलत्वतश्च ।
अमात्वमाशङ्क्य निराचकार न्यायैश्चतुर्भिः प्रतिपाद्य तत्तत् ।। ११ ।।

*1.1.5 ईक्षत्यधिकरणम्

गौणी तु गौणेक्षण साहचर्यात् ईक्षा यतस्तज्जगतां निदानम् ।
प्रधानं इत्येदपाचकार मुख्यं यतो वीक्षणं आत्मशब्दात् ।। १२ ।।

*1.1.6 आनन्दमयाधिकरणम्

विकारवाची मयडित्यमुष्मात् क्षेत्रज्ञमानन्दमयं विशङ्क्य ।
असंभवात् प्राणमये च हानेः प्राचुर्यवाचीति निराचकार ।। १३ ।।

*1.1.7 अन्तरधिकरणम्

देहित्वतश्चेतन एव कश्चित् पुण्योत्तरो मण्डलमध्यवर्ती ।
इत्येवमुत्सारयते स्म शङ्कां लोकेशताद्यैः परमात्मधर्मैः ।। १४ ।।

*1.1.8 आकाशाधिकरणम्

आकाश इत्येव विशेषनाम्ना स व तु स्यात् जगतां निदानम् ।
प्राणोऽथवेत्येतदपाचकार भूताभिसंवेशमुखैश्च लिङ्गैः ।। १५ ।।

*1.1.10 ज्योतिरधिकरणम्

न हि स्ववाक्ये परलिङ्गधर्माः ज्योतिस्तु तद्भूततृतीयमेव ।
एतन्न शङ्क्यं, न हि तस्य पादो भूतानि किन्त्वस्य परस्य पुंसः ।। १६ ।।

*1.1.11 इन्द्रप्राणाधिकरणम्

इन्द्रे तु निर्धारित जीवभावे स्वोपास्ति शब्दात् स हि कारणं स्यात् ।
एतन्न सत्, तस्य हि शास्त्रदृष्ट्या तथोपदेशोऽमृतता च धर्मः ।। १७ ।।

**अ-१,पा-१ पादावतारः

सर्ज्ञमानन्दमयं सरूपं तेजस्विनं प्राणनकारणं च ।
सुस्थानमात्मानमुदाजहार पादेन पूर्वेण जगन्निदानम् ।। १८ ।।

**अ-१,पा-२ पादावतारः -१

शास्त्रे त्वमुष्मिन् जगतां निदानं ब्रह्मैव साक्षात् चिदचिच्छरीरम् ।
इत्येवमर्थं विशदीकरिष्यन् पादान् अथ त्रीन् प्रचकार शेषान् ।। १९ ।।

**अ-१,पा-२ पादावतारः -२

तत्र द्वितीयेन शरीरम् आसीत् तत्प्रत्यशेषः चिदचित्प्रपञ्चः ।
तृतीयतस्तस्य तदात्मभावः चतुर्थतस्तद्विपरीतभङ्गः ।। २० ।।

द्वितीय पादः

*1.2.1 सर्वत्रप्रसिद्ध्यधिकरणम्

स्वकर्मतः कारणताभियोगात् अल्पत्वतोऽल्पायतनत्वतश्च ।
सर्वं समाशङ्क्य निरास जीवं प्रसिद्धितस्तद्गुणतः स्मृतेश्च ।। २१ ।।

*1.2.2 अत्तरधिकरणम्

अत्ता तु जीवो न परः स्वतन्त्रः स एव यत्कर्मफलोपभोगी ।
इत्यप्यसत् तद्धि चराचरस्य मृत्यूपसेकात् अदनं त्वपीतिः ।। २२ ।।

*1.2.3 अन्तराधिकरणम्

अक्ष्यन्तरस्त्वेष इति प्रसिद्ध्या जीवोऽथवा बिम्बम् अथापि दैवम् ।
इत्यप्यसत् स्यात् अमृतत्वशब्दात् सुखश्रुतेश्चाप्यनवस्थितेश्च ।। २३ ।।

*1.2.4 अन्तर्याम्यधिकरणम्

द्रष्टेति शब्दात् इह वाक्यशेषे द्रष्ट्रन्तरस्य प्रतिषेधतश्च ।
क्षेत्रज्ञमन्तर्यमयन्तमाहेत्येतन्न जागर्त्यमृतत्वशब्दात् ।। २४ ।।

*1.2.5 अदृश्यत्वादिगुणकाधिकरणम्

स्थूलत्वदृश्यत्व निषेधनेन सूक्ष्मं त्वदृश्यत्वगुणं प्रधानम् ।
क्षेत्रज्ञ एवाक्षर मित्यसत् स्यात् प्रतिज्ञया तत्परतः परत्वात् ।। २५ ।।

*1.2.6 वैश्वानराधिकरणम्

कौक्षेयवह्निस्त्वथ देवता वा भूतं तृतीयं त्वथवाऽग्निशब्दात् ।
वैश्वानरः स्यात् इति, नैव यस्मात् त्रैलोक्यदेहः पुरुषाभिधा च ।। २६ ।।

**अ-१,पा-२ पादसंग्रहः

स्थूलस्य सूक्ष्मस्य तथेन्द्रियाणां एकैकशश्चावयवत्वतश्च ।
तद्देहतां संप्रतिपाद्य पश्चात् तदन्यदेहत्वं अपाचकार ।। २७ ।।

**अ-१,पा-२ पादोसंहारः

पादेनेत्थं अनेनार्थात् जगतः तच्छरीरता ।
सामानाधिकरण्येन तदन्येन च साधिता ।। २८ ।।

तृतीय पादः

तृतीय पादः

*1.3.1 द्युभ्वाद्यधिकरणम्

मनः प्रभृत्यक्षसमाश्रयत्वात् द्युभ्वाश्रयः चेतन एव नान्यः ।
एवं न शङ्क्यं स्फुटं आत्मशब्दात् मुक्तोपसृप्य व्यपदेशतश्च ।। २९ ।।

*1.3.2 भूमाधिकरणम्

नामाद्युपक्रम्य कृतोपदेशः समापितः प्राणननाम्नि जीवे ।
ततः स भूमेति न शङ्कनीयं सत्योपदेशात् अधिकं त्वमुष्मात् ।। ३० ।।

*1.3.3 अक्षराधिकरणम्

अव्याकृतं चेतन एव वापि स्यादक्षरं चास्पदम् अम्बरस्य ।
कार्यास्पदत्वात् अचिदाश्रयत्वात् इत्यप्यसत् तस्य धृतेः प्रशास्तेः ।। ३१ ।।

*1.3.4 ईक्षतिकर्माधिकरणम्

भुवोऽन्तरिक्षात् अधिकोपदिष्टो यो ब्रह्मलोकः स विधातृलोकः ।
तत्र त्रिमात्रप्रणवानुचिन्त्यो धातेत्यसत् स्यात् अमृताभिधाद्यैः ।। ३२ ।।

*1.3.5 दहराधिकरणम्

दहस्तु खं स्यात् अथ चेतनो वा प्रसिद्धियोगात् गुणयोगतश्च ।
न साध्विदं खे न हि सत्यभावः कामाश्च जीवे न निसर्गसिद्धाः ।। ३३ ।।

*1.3.6 प्रमिताधिकरणम्

'प्राणाधिपः सञ्चरती'ति वाक्ये प्रसिद्धितोऽङ्गुष्ठमितो हि जीवः ।

इत्यप्यसाध्वेव भवेत् अमुष्मिन् ईशानशब्दश्रवणाद्धि वाक्ये ।। ३४ ।।

*1.3.7 देवताधिकरणम्

अविग्रहा विग्रहवत्प्रसाध्ये संराधने नाधिकृतास्तु देवाः ।
इत्यप्यसत् कल्पित नामरूपाः तस्मात् मनुष्या इव तेऽपि शक्ताः ।। ३५।।

*1.3.8 मध्वधिकरणम्

मध्वादिविद्यास्वधिकारभाजः वस्वादयो नैव वसुत्वयोगात् ।
उपास्यभावात् इति नैव यस्मात् भूयोऽपि वाञ्छाऽस्ति परो ह्युपास्यः ।। ३६ ।।

*1.3.9 अपशूद्राधिकरणम्

स्वाध्यायहीना अपि भारतादीन् श्रुत्वाऽथ विज्ञाय परं पुमांसम् ।
उपासते शूद्रगणा इतीदं न सत्, निषेधात् श्रवणादिकस्य ।। ३७ ।।

*1.3.10 अर्थान्तरत्वादिव्यपदेशाधिकरणम्

धूत्वेति वाक्ये प्रकृतस्तु पूर्वम् आकाशतां ऋच्छतु मुक्त एव ।
एतन्न हि प्राणिति नामरूप निर्वाहकौ नैव हि बद्धमुक्तौ ।। ३८ ।।

**अ-१,पा-३ पादसंग्रहः -१

अक्लिष्टभावः सुखरूपता च प्रशासितृत्वं श्रयणीयता च ।
गुणोत्तरत्वं त्वजुगुप्सता च निर्वोढृता च प्रतिपादिताऽस्मिन् ।। ३९ ।।

**अ-१,पा-३ पादसंग्रहः -२

प्रधान जीवयोः व्यष्ट्योः समष्ट्योश्चाऽऽत्मता क्रमात् ।
उक्ता तृतीये तु पुनः तस्याः शासनताऽपि च ।। ४० ।।

**अ-१,पा-३ पादसंग्रहः -३

चतुर्थपञ्चमाभ्यां तु स्वरूपेण गुणैरपि ।
उपास्यतार्थं आत्मत्वं इत्यात्मत्वप्रयोजनम् ।। ४१ ।।

**अ-१,पा-३ पादसंग्रहः -४

हेयेऽपि तत्तत्सम्बन्धे नैवेशत्वात् जुगुप्सते ।
इति न्यायेन षष्ठेन प्रोक्तम् आत्मत्वसिद्धये ।। ४२ ।।

**अ-१,पा-३ पादसंग्रहः -५

मध्ये प्रसङ्गात् षष्ठस्य देवदेव विशेषयोः ।
विद्याधिकारः शूद्राणां तदभावश्च साधितः ।।
सप्तमात् ईशितृत्वं तु निर्वोढृत्वात् स्थिरीकृतम् ।। ४३ ।।

**अ-१,पा-३ पादसंग्रहः -६

एवं एतैः त्रिभिः पादैः कारणं ब्रह्म साधितम् ।
चतुर्थात् तच्च हेतुत्वं तस्यैवेति प्रसाध्यते ।। ४४ ।।

चतुर्थी पादः

चतुर्थ पादः

*1.4.1 आनुमानिकाधिकरणम्

अव्यक्तं महतः परं तु पुरुषः तस्मात् परः तत्परं नैवास्तीति कुतन्त्र
सिद्धगणना तत्प्रक्रियानुस्मृतेः ।
एतन्नैव यथार्थमत्र रथताद्युक्तेषु वागादिकेषु अव्यक्तं तु शरीरमेव
ुरुषः सोऽयं परः पूरुषः ।। ४५ ।।

*1.4.2 चमसाधिकरणम्

'अजां' इत्येतस्मिन् वचसि गदितं तन्वगदितं प्रधानं स्वातन्त्र्यात्
सकलजगती सर्गकरणात् ।
इदं नैवैतस्मिन् खलु सृजतिमात्रं त्वभिहितं विशेषस्याभावात् वदति च विशेषं
श्रुतिरतः ।। ४६ ।।

*1.4.3 संख्योपसंग्रहाधिकरणम्

'यस्मिन् पञ्चजनाश्च पञ्च गगनं चापी'ति वाक्ये स्फुटं संख्यासंग्रहणात् तु
तन्त्रगणनेत्येतन्न हि प्राणिति ।
ब्रह्माधारतया स्थितेरतिशयस्फूर्तेश्च संज्ञात्वतः प्राणादीन्द्रियपञ्चकस्य च
यथा सप्तेति सप्तर्षयः ।। ४७ ।।

*1.4.4 कारणत्वाधिकरणम्

क्वचित् सत् क्वाप्यात्मा क्वचित् असदपि क्वापि पुरुषः क्वचित् ब्रह्मेत्येवं
विविधवचनात् हेतुवचसाम् ।
न निर्णीतिः क्वापि त्विति न खलु, सर्वत्र हि परः समाकृष्टो
लिङ्गप्रकरणगुणाद्यैरिति यतः ।। ४८ ।।

*1.4.5 जगद्वाचित्वाधिकरणम्

'यः कर्ता यस्य कर्मे'त्यभिहितपुरुषो जीव एवात्र वृत्तः कर्तृत्वात्
कर्मवत्वात् सहज निजगुणैः भोक्तृभावप्रतीतेः ।
इत्येवं नैव शङ्क्यं जगदिह वचने कर्मशब्दाभिधेयं दृष्ट्यर्थं प्राणजीवग्रहणमिह
सुषुप्त्याश्रयो ब्रह्म यस्मात् ।। ४९ ।।

*1.4.6 वाक्यान्वयाधिकरणम्

पत्यादीनां प्रियत्वं स्वकृतमिति वचस्यत्र जीवोऽभिधेयः द्रष्टव्यत्वेन
यस्मात् श्रुतमिह पतिपत्न्यादि सम्बन्ध भाक्त्वम् ।
नैवान्यस्मिन् हि वाक्यान्वयनं अमृतता हेतुभावस्तथोक्तः वाक्यान्ते
जीवलिङ्गश्रवणमिदमवस्थानतोऽन्तः परस्य ।। ५० ।।

*1.4.7 प्रकृत्यधिकरणम्

उपादानात् अन्यत् त्वितरदिति नैकत्रघटना विकारित्वाभावश्रवणमपि जागर्ति भुवने ।
अतो नोपादानं पर इति न शक्यं कथयितुम् प्रतिज्ञानात् साक्षात् उभयकथनात् किंस्विदिति च ।। ५१ ।।

**अ-१,पा-४ पादसंग्रहः -१

प्रक्रिया प्रत्यभिज्ञानात् स्वभावकथनात् तथा ।
संख्योपसंग्रहाचापि व्याकुलत्वात् परस्परम् ।। ५२ ।।

**अ-१,पा-४ पादसंग्रहः -२

कर्मसम्बन्धकथनात् पत्यादि श्रवणात् तथा ।
लोके च भेदसन्दृष्टेः उपादाननिमित्तयोः ।। ५३ ।।

**अ-१,पा-४ पादसंग्रहः -३

ब्रह्मैव कारणं नान्यत् इत्येषा नैव निश्चितिः ।
इति यत् तान्त्रिकेषूक्तं तदनेन निराकृतम् ।। ५४ ।।

**अ-१,पा-४ पादसंग्रहः -४

त्रिभिः प्रधानस्य निराकृतिः स्यात् चतुर्थतोऽन्योन्य विरोधभङ्गः ।
मुक्तिं गतो बन्धगतश्च जीवो व्यावर्तितः पञ्चमषष्ठकाभ्याम् ।। ५५ ।।

**अ-१,पा-४ पादसंग्रहः -५

एतावता सूत्रकलापकेन निरीश्वरं सांख्यं अपाचकार ।
शेषात् धुनोति स्म स चेश्वरं तत् ऐक्यं निमित्तेश्वरयोः समिच्छन् ।। ५६ ।।

**अ-१,पा-४ पादसंग्रहः -६

एवं जगत्कारणवादिवाक्यैः उक्तं समस्तैरपि चैककण्ठैः ।
ब्रह्मैव सर्वज्ञमनन्तशक्ति निदानमेषां जगतामितीदम् ।। ५७ ।।

**अ-१,पा-४ अध्यायसंग्रहः

सूक्ष्मचिदचिच्छरीरं कारणतां याति तत् परं ब्रह्म ।
स्थूलचिदचिच्छरीरं पुनश्च तत् कार्यतां याति ।। ५८ ।।

द्वितीयोऽध्यायः

प्रथम पादः

प्रथम पादः

*2.1.1 स्मृत्यधिकरणम्

स्मृतेर्विरोधादुपबृंहणस्य न ब्रह्म हेतुर्जगतामितीदम् ।
असारमन्यस्मृतिभिर्विरोधात् तेषां त्वनाप्तिश्च न शक्यशङ्का ।। १ ।।

*2.1.2 योगप्रत्युक्त्यधिकरणम्

ब्रह्मेति वेदान्तसमर्थितोऽर्थः तत्सेश्वर स्मृत्यनुसारहानेः ।
असाध्वितीदं न, परैर्विरोधात् जीवत्वतो विभ्रमसंभवाच्च ।। २ ।।

*2.1.3 विलक्षणत्वाधिकरणम् *2.1.4

यद्यत्कार्यं न तत्तत्प्रतिभटगुणकं ब्रह्म चेदं च विश्वम् ।
ज्ञात्वाज्ञत्वादि धर्मैः प्रतिभयमथ चेदीक्षणाच्चेतनत्वम् ।। ३ ।।

*2.1.5 भोक्त्रापत्त्यधिकरणम्

तत्तासां देवतानामिति तु न चतुरं दृश्यते मक्षिकादेः ।
कृम्यादि द्रव्यभेदो यदि न भवति तत्कार्यहेत्वोरलं स्यात् ।। ४ ।।

*2.1.6 आरम्भणाधिकरणम्

भोक्तृत्वं स्याज्जीववद्देहवत्त्वात् इत्येतस्मान्नाधिकं ब्रह्म सिद्ध्येत् ।
नैतच्छङ्क्यं मुक्तवत्कर्महानेः युज्येतैतत् राजवच्चापि लोके ।। ५ ।।

*2.1.7 इतरव्यपदेशाधिकरणम्

बुद्ध्याकाराभिधान व्यवहृतिगणनैर्भेदकैः कार्यहेत्वोः एकत्वं नैव सिध्येत्
इति तु न चतुरं कारकानर्थता च ।
सद्ब्रह्मात्मादि शब्दैरभिहितमपृथग्येन शब्दादिभेदो द्रव्यावस्थावलंबी तत
इह न भवेत् कारकानर्थता च ।। ६ ।।

*2.1.8 उपसंहारदर्शनाधिकरणम्

जीवस्य ब्रह्मभावं व्यपदिशति यतस्तत्त्वमस्यादिवाक्यं तस्माद्दुःखैककन्दं
न हि सृजति जगत् कः स्वदुःखाभिलाषी ।
नैवैतद्येन भेदं प्रकटयति तयोरन्य इत्यादि वाक्यं देहात्मत्वादि भेदश्रवणमपि
यथा चेतनैक्योपदेशः ।। ७ ।।

*2.1.9 कृत्स्नप्रसक्त्यधिकरणम्

यत्कारणं कारकसेव्यपक्षं तत्स्यात् परं ब्रह्म न तद्व्यपेक्षम् ।
अतो न हेतुस्त्विति नैव यस्मात् क्षीरं तु नैवेच्छति तत् दधित्वे ।। ८ ।।

*2.1.10 प्रयोजनवत्त्वाधिकरणम्

ब्रह्म स्यात् कार्यशेषं निखिलमवयवाभावतः सांशता चेत् व्याकोपः
स्यादिदानीमवयवविरह श्राविणीनां श्रुतीनाम् ।
हेतुत्वं तस्य तस्मात् विहतमुभयथेत्येतदप्यात्तसारं वैलक्षण्यात्प्रकाराच्छ्रुतिभिरपि
तथा ज्ञापनाच्छक्तिमत्त्वात् ।। ९ ।।

*2.1.10 प्रयोजनवत्त्वाधिकरणम्

कामानां समवाप्तितो न हि फलं किञ्चित् समालोक्यते सृष्टेरस्य परस्य नापि दयया
दुःखैकहेतुत्वतः ।
नैवैतत् स हि लीलयैव तनुते पुण्याद्यपेक्षावशात् वैषम्यादि च नास्ति कर्मवशता
सिद्धेरनादित्वतः ।। १० ।।

*2.1.10 प्रयोजनवत्त्वाधिकरणम्

कपिलस्मृतेर्विरोधात् हिरण्यगर्भस्मृते र्विरोधाच्च ।
न्यायविरोधात् भोगप्रसङ्गतः कार्यहेतुभेदाच्च ।। ११ ।।

**अ-२,पा-१ पादसंग्रहः -१

जीवब्रह्मैकत्वात् कारकसंग्रहणहानितश्चापि ।
कार्यैकशेषभावात् फलहानेश्चोत्थितं तु पर्यहरत् ।। द्वाभ्यां स्मृत्यविरोधः
स्यात् शेषैर्न्यायाविरोधिता । चतुर्थपञ्चमौ तत्र तृतीयोक्तौ प्रसंगतः ।। १२ ।।

**अ-२,पा-१ पादसंग्रहः -२

तस्मात् षष्ठं तृतीयं च पादेऽस्मिन् संगते मते ।
षष्ठादयस्तु चत्वारः संगच्छन्ते यथाक्रमम् ।। १३ ।।

**अ-२,पा-१ पादसंग्रहः -३

तच्छायवाक्यैरुत्थानं तथा न्यायेन चोद्गमः ।
इति पूर्वेण पादेन संगतिः स्यात् सुशोभना ।। १४ ।।

द्वितीय पादः

द्वितीय पादः

*2.2.1 रचनानुपपत्त्यधिकरणम्

वेदाहृता यद्यपि तत्त्वसंख्या जीवान् बहून् इच्छति चापि तन्त्रम् ।
यत्कारणं तत् खलु कर्त्रपेक्षं नैतत्तथा तान्त्रिकमित्यसाधु ।। १५ ।।

*2.2.2 महद्दीर्घाधिकरणम्

ईशश्च कर्ता बहवश्च जीवाः तथाऽपि न न्यायगतिस्समर्था ।
कार्यानुपायादणुभिर्निरंशैः कार्यत्वतोऽरूपतया च तेषाम् ।। १६ ।।

*2.2.3 समुदायाधिकरणम्

संघैरणूनां हि धरादयः स्युः धरादिभूतैः करणादयश्च ।
इत्यप्यसारं क्षणिकाः पदार्थाः क्व संहताः स्युः क्व च कार्यसिद्धिः ।। १७ ।।

*2.2.4 उपलब्ध्यधिकरणम्

आकार एकस्तु विवादहानेः ज्ञानस्य नार्थस्य ततः स नास्ति ।
इत्यप्यसत् स्यात् त्रितयावभासात् विज्ञानवत् ज्ञेयतदाश्रयौ च ।। १८ ।।

*2.2.5 सर्वथानुपपत्त्यधिकरणम्

नित्योत्पत्तिप्रसङ्गात् अविकृतभवनं नाम नैवोपपन्नं नैवावस्थानहानेः
विकृतभवनमप्यश्नुते युक्तिमत्ताम् ।
तस्मात्तुच्छात् प्रभूतं भुवनम् इति न सद्वस्तुनः कस्यचित्स्यात्
भावाभावव्यवस्था तदितरविषये तेन तुच्छत्वहानिः ।। १९ ।।

*2.2.6 एकस्मिन्नसंभवाधिकरणम्

सर्वं च सत्त्वादि पटादिभावैः भिन्नं त्वभिन्नं स्थिरमस्थिरं च ।
इत्यप्यसत् येन विरुद्धधर्मौ नैकाश्रयावन्यकृता प्रतीतिः ।। २० ।।

*2.2.7 पशुपत्यधिकरणम्

पत्युः पशूनां मतम् आदरार्हं सर्वज्ञभावाच्च परिग्रहाच्च ।
इत्यप्यसत् वेदविरुद्धधर्मपरावरादिप्रतिपादनेन ।। २१ ।।

*2.2.8 उत्पत्त्यसंभवाधिकरणम्

जीवः परस्मात्तु मनस्तु जीवात् इत्यादिभिः वेदविरोधदृष्टेः ।
स्यात् पञ्चरात्रं न सत् इत्यसारं व्यूहाभिधानात् प्रतिषेधतश्च ।। २२ ।।

*2.2.8 उत्पत्त्यसंभवाधिकरणम्

कपिलकणभुग्बुद्धार्हन्तो हताः सह शंभुना कुलिशनिशितैरेतैस्तर्कैः
अकर्कशबुद्धयः ।
अपि च भगवद्दृष्टा श्रीपाञ्चरात्रगतिस्त्वियं न खलु सदृशी बाह्यैरन्यैरिति
प्रतिसाधितम् ।। २३ ।।

*2.2.8 उत्पत्त्यसंभवाधिकरणम्

स्मृतिन्यायाविरोधं च परपक्षपराहतिम् ।
विधाय परतो द्वाभ्यां कार्यभावो विचिन्त्यते ।। २४ ।।

तृतीय पादः

तृतीय पादः

*2.3.1 वियदधिकरणम्

उत्पत्तिमन्तो न यथैव जीवाः नभश्च नोत्पत्तिमत् अंशहानेः ।
इति त्वसारं वदति श्रुतिश्चेत् तथैव तत् स्यात् न तु तर्कभङ्गः ।। २५ ।।

*2.3.2 तेजोधिकरणम्

कार्याणि सर्वाणि तथा श्रुतत्वात् स्थानान्तरात् कारणतो भवन्ति ।
नैवं श्रुतेरव्यवधानदृष्ट्या तत्तच्छरीरात् परतो भवन्ति ।। २६ ।।

*2.3.3 आत्माधिकरणम्

'तोयेन जीवान्' इति वाक्यभावात् प्रतिज्ञया जायत एव जीवः ।
इदं त्वसारं कृतविप्रणाशप्रसङ्गतो 'नित्य' इति श्रुतेश्च ।। २७ ।।

*2.3.4 ज्ञाधिकरणम्

विज्ञानशब्दात् स्वपनेष्वदृष्टेः संज्ञानमागन्तुक चेतनो वा ।
नैवं श्रुतेः सङ्कुचितं सुषुप्तौ ज्ञानाभिधा तद्गुणसारतः स्यात् ।। २८ ।।

*2.3.5 कर्त्राधिकरणम्

नान्यं गुणेत्यादिषु कर्तृताऽस्य निषिध्यते येन ततो न कर्ता ।
इत्येतदेवं न विशङ्कनीयं शास्त्रार्थवत्त्वात् उपपत्तितश्च ।। २९ ।।

*2.3.6 परायत्ताधिकरणम्

कर्तृत्वं एतस्य परानपेक्षं शास्त्रार्थवत्त्वाय स हि स्वतन्त्रः ।
नैतत् श्रुतिभ्यो न च शास्त्रकोपः प्रयत्नसापेक्षतया परस्य ।। ३० ।।

*2.3.7 अंशाधिकरणम्

भेदान्न जीवोंऽश इति श्रुतीनां दृष्टो विरोधस्त्वितरेतरेण ।
अंशस्मृतेः पादतयोपदेशात् स्यादंश एवास्य परस्य जीवः ।। ३१ ।।

**अ-२,पा-३ पादसंग्रहः -१

कार्यता वियदादीनां तस्याश्चाव्यवधानता ।

उत्पत्त्यभावो जीवस्य ज्ञातृता कर्तृताऽपि च ।। ३२ ।।

**अ-२,पा-३ पादसंग्रहः -२

कर्तृतायाः परापेक्षा परं प्रत्यंशताऽपि च ।

इत्थमर्थास्त्वमी सर्वे पादेनानेन चिन्तिताः ।। ३३ ।।

**अ-२,पा-३ पादसंग्रहः -३

प्रथमश्च द्वितीयश्च तृतीयश्चात्र सङ्गताः ।

तृतीयशेषाश्चत्वारः प्रसङ्गात् त्विह चिन्तिताः ।। ३४ ।।

चतुर्था पादः

चतुर्थ पादः

*2.4.1 प्राणोत्पत्त्यधिकरणम्

न हि जननं इन्द्रियाणां प्राणा अग्रेऽभवन् इति श्रुत्या ।

नैवं प्राणस्तु परः प्रतिज्ञया गौणमेव बहुवचनम् ।। ३५ ।।

*2.4.2 सप्तगत्यधिकरणम्

सप्त तु यदेति वाक्यात् सप्त प्राणा इति श्रुतेश्चापि ।

नैवं प्रधानभावात् 'दशेम' इति वाक्यतः स्मरणात् ।। ३६ ।।

*2.4.3 प्राणाणुत्वाधिकरणम्

तानि तु विभूनि युक्तं 'सर्वेऽनन्ताः समा' इति श्रवणात् ।

नैवमुपास्त्यर्थत्वात् उत्क्रमणश्रुतित एव चोत्क्रमणे ।। ३७ ।।

*2.4.4 वायुक्रियाधिकरणम्

वाक्यात् प्रसिद्धेश्च विशंक्यतेऽयं न वायुमात्रं न च तत्क्रिया वा ।

प्राणस्तु देहादिभृदेव वायुः प्राणस्य वाक्योश्च पृथक्त्वशब्दात् ।। ३८ ।।

*2.4.5 श्रेष्ठाणुत्वाधिकरणम्

लोकैः त्रिभिः साम्यगिरा विभुः स्यात् प्राणस्त्वितीदं न विशङ्कनीयम् ।

उत्क्रान्ति शब्दादिभिरस्य लोकैः साम्यश्रुतिर्याऽव तथाऽर्थवादः ।। ३९ ।।

*2.4.6 ज्योतिराद्यधिष्ठानाधिकरणम्

वागाद्यधिष्ठानम् इह स्वतः स्यात् जीवेन सार्थं ज्वलनादिकानाम् ।

नैवं परात्मामननात् अमीषां एतत्तु 'योऽग्नौ' इति च श्रुतत्वात् ।। ४० ।।

*2.4.7 इन्द्रियाधिकरणम्

प्राणाभिधानात् उपकारसाम्यात् ष्येष्ठोऽपि चायं स्फुटमिन्द्रियं स्यात् ।
नैतत् 'दशे'ति व्यपदेशभावात् प्राणो मनश्चेन्द्रियमित्यतश्च ।। ४१ ।।

*2.4.8 संज्ञामूर्तिकिप्त्यधिकरणम्

नामादिसृष्टिस्तु हिरण्यगर्भात् भवेत् 'अनेने'ति तु वाक्यभावात् ।
नैवं परादेव तु तच्छरीरात् सेयं त्रिवृत्कार समानकर्तुः ।। ४२ ।।

**अ-२,पा-४ पादसंग्रहः -१

उत्पत्त्या संख्यानं परिमाणं चैव करणानाम् ।
प्राणस्य च स्वरूपं परिमाणमनिन्द्रियत्वं च ।। ४३ ।।

**अ-२,पा-४ पादसंग्रहः -२

एतेषां सर्वेषां सर्गकरो व्यष्टिभूतानाम् ।
इत्येतदखिलममुना पादेन विचिन्तितं सम्यक् ।। ४४ ।।

**अ-२,पा-४ पादसंग्रहः -३

प्रथमे प्रसक्तरूपाः पञ्चापि विचिन्तिता द्वितीयाद्याः ।
तस्मात् सङ्गतमस्मिन् पादे प्रथमं च चरमं च ।। ४५ ।।

**अ-२,पा-४ पादसंग्रहः -४

प्राणस्वरूपचिन्ता प्राणतया शब्दनेन करणानाम् ।
प्रासङ्गिकप्रसिद्धा प्रसङ्गतस्तद्विशेषचिन्ता च ।। ४६ ।।

**अ-२,पा-४ पादसंग्रहः -५

अण्डबहिर्भूतानां पूर्वेण विचिन्तिता सृष्टिः ।
सृष्टिस्तु चिन्तिता स्यात् अण्डान्तर्वर्तिनामनेनापि ।। ४७ ।।

तृतीयोऽध्यायः

प्रथम पादः

प्रथम पादः

*3.1.1 तदन्तरप्रतिपत्त्यधिकरणम्

न भूतसूक्ष्मैः सह याति देही तवैव तेषां सुलभत्वहेतोः ।
नैवैवं 'आप पुरुषा भवन्ति' इत्येवं श्रुतत्वात् सह तैः प्रयाति ।। १ ।।

*3.1.2 कृतात्ययाधिकरणम्

'प्राप्यान्तं' इत्यादिभिरेव वाक्यैः आयातु जीवो न तु कर्मशेषी ।
नैतत्फलं कर्मनिबन्धनं तु 'कपूयचारा' इति च श्रुतत्वात् ।। २ ।।

*3.1.3 अनिष्टादिकार्यधिकरणम्

'ये वै च केऽपी' त्यविशेषशब्दात् धूमादिकं केवलपापिनां च ।
इति त्वसत् स्यात् 'अथ ये'ति वाक्यात् पुण्यावलम्बी तु विशेषशब्दः ।। ३ ।।

*3.1.4 तत्स्वाभाव्यापत्त्यधिकरणम्

तद्देहता स्यात् वियदादिभावः सोमत्ववन्नास्ति यतो विशेषः ।
नैवं, न भोगोऽस्ति यतोऽत्र तस्मात् सादृश्यमेवात्र न तत्तनुत्वम् ।। ४ ।।

*3.1.5 नातिचिराधिकरणम्

आव्रीहिभावात् अचिरात् चिरात् वा सन्तिष्ठतेऽयं नियतेरभावात् ।
नैवं विशंक्यं परतो विशेषात् 'अतो हि दुर्निष्पतं' इत्यमुष्मात् ।। ५ ।।

*3.1.6 अन्याधिष्ठिताधिकरणम्

'जायन्त' इत्येव विशेषशब्दात् व्रीह्यादिदेहास्तु भवन्ति जीवाः ।
नैतत्तु गौणं जननाभिधानं तद्धेत्वभावात् परतस्तु भावात् ।। ६ ।।

**अ-३,पा-१ पादसंग्रहः -१

भूतसूक्ष्मैः परिष्वङ्गः कर्मशेषसहायता ।
अपुण्यानामनारोहो वियदादिसदृक्षता ।। ७ ।।

**अ-३,पा-१ पादसंग्रहः -२

तत्राचिरादवस्थानं व्रीह्यादेः श्लेषणं तथा ।
इत्यर्थाः षडमी सम्यक् पादेनानेन चिन्तिताः ।। ८ ।।

**अ-३,पा-१ पादावतारः

गमनागमनप्रकारचिन्ता विहितोपासिसिषा प्रसिद्धिहेतोः ।
न तु कश्चन दोषमात्मसंस्थं यदि नेक्षेत तदा परं ह्युपास्ते ।। ९ ।।

द्वितीय पादः

*3.2.1 सन्ध्याधिकरणम्

गुणित्वतः सन्निधितश्च जीवः स्वाप्नार्थकर्तेति न शंक्यमेतत् ।
असंभवत्वात् अहितक्रियायाः तिरोहितत्वेन गुणस्य चास्य ।। १० ।।

*3.2.2 तदभावाधिकरणम्

श्रुतौ विशेषाग्रहणात् सुषुप्तेः नाड्यः पुरीतत् परमोऽथवा स्यात् ।

भूमिस्त्वितीदं न, विकल्पदोषात् प्रासादखट्वाशयनादिवत् स्यात् ।। ११ ।।

*3.2.3 कर्मानुस्मृतिशब्दविध्यधिकरणम्

प्राप्त्या परस्याखिलकर्मनाशात् अन्यः प्रबोद्धा न पुनः सुषुप्तः ।
नैवार्थवत्त्वात् विधिकर्मणोः स्यात् अनुस्मृतेः व्याघ्र इति श्रुतेश्च ।। १२ ।।

*3.2.4 मुग्धाधिकरणम्

प्राणस्य सर्वेन्द्रियसंहृतेश्च व्यापारहानेर्मरणं तु मूर्च्छा ।
मुग्धेऽर्धलाभो मरणस्य सा स्यात् आकारवैषम्यसमुत्थितिभ्याम् ।। १३ ।।

*3.2.5 उभयलिङ्गाधिकरणम्

आत्मेच्छया वाऽप्यतिहेयभावात् पूयादिसङ्गः स परस्य दोषः ।
तत्स्थानसंबन्धितयेति, नैतत् सर्वत्र निर्दोषगुणित्वशब्दात् ।। १४ ।।

*3.2.6 अहिकुण्डलाधिकरणम्

नानात्वैकत्वयुक्तेः परिणमनमचित्त्वेन चेत् बाधितत्वं निर्दोषत्वश्रुतेः
स्यात् अथ तदुभययोरेक सामान्ययोगः ।
नैतत् स्यान्नैव लोके क्वचिदपि कथितः खण्डशब्देन मुण्डः तस्मादंशत्वमंशित्वमपि
हि जगतो ब्रह्मणश्चाऽऽत्मवत् स्यात् ।। १५ ।।

*3.2.7 पराधिकरणम्

सेतुत्वव्यपदेशतो मिततया संशब्दनात् प्रापक- श्रुत्या चापि 'ततो यदुत्तरतरं'
त्वित्येव भेदग्रहात् ।
प्राप्योऽन्यः परतोऽपि कश्चिदिति यन्नैतत् त्वसंभेदनात्
ध्येयत्वादपवर्गसाधनतया हेतुत्वसंशब्दनात् ।। १६ ।।

*3.2.8 फलाधिकरणम्

साक्षात् क्रमात् वा फलदत्वदृष्टेः अत्रापि कर्मैव फलं ददातु ।
नैवेदमन्यार्थतया तु किप्तेः श्रुतिस्मृतिभ्यश्च स एव दत्ते ।। १७ ।।

**अ-३,पा-२ पादसंग्रहः -१

स्वप्नः सुषुप्तिः प्रतिबोधनं च मूर्च्छा च जीवस्य, परस्य चापि ।
निर्दोषभावो जगदंशभावः सर्वेश्वरत्वं फलदातृता च ।। १८ ।।

**अ-३,पा-२ पादसंग्रहः -२

न्यायैश्चतुर्भिराद्यैः विचिन्तितः पूर्वपादशेषस्तु ।
तस्मादत्र तु पादे सुसङ्गतं पञ्चमात् प्रभृति ।। १९ ।।

**अ-३,पा-२ पादसंग्रहः -३

स्थानित्वात् अचिदैक्यात् अवरत्वात् अफलदत्वाच्च ।
अनुपास्यम् इति तु शङ्कां शकलयति स्मौत्तरैः चतुर्भिः इह ।। २० ।।

तृतीय पादः

*३.३.१ सर्ववेदान्तप्रत्ययाधिकरणम्

अविशेषतः श्रुतत्वात् प्रकरणभेदाच्च भेदिनी विद्या ।

नैवं प्रतिपत्तॄणां भिन्नत्वात् चोदनाद्यभेदाच्च ।। २१ ।।

*३.३.२ अन्यथात्वाधिकरणम्

उद्गीथैक्यं चोदनादेरभेदात् छन्दोगानां वाजिनां चेति नैतत् ।

उद्गीथांशोद्गीथयोः प्राणदृष्ट्या रूपानैक्यात् कर्मकर्त्रोस्तथा च ।। २२ ।।

*३.३.३ सर्वाभेदाधिकरणम्

प्राणस्य ज्यैष्ठ्यादौ सत्यपि न वसिष्ठतादयः कथिताः ।

भेदो रूपविभेदान्नैतत् स्युस्तेऽपि तदितराभेदात् ।। २३ ।।

*३.३.४ आनन्दाद्यधिकरणम्

अप्रकरणपठितत्वात् आनन्दाद्या गुणा न संग्राह्याः ।

सर्वास्विति तु न शंक्यं, तैस्तु विना तन्निरूपणाशक्तेः ।। २४ ।।

*३.३.५ कार्याख्यानाधिकरणम्

'आचामेत्' इति विहितं प्राणोपास्त्यङ्गमन्यदाचमनम् ।

नैतत् अनूद्य विधेयं ह्यप्राप्तेः प्राणवासस्त्वम् ।। २५ ।।

*३.३.६ समानाधिकरणम्

संकल्पसत्यवशिताद्यतिरेकात् विरूपभेदतो ह्यस्याः ।

भेद इति नैव यस्मात् वशिता सङ्कल्पसत्यतावितितिः ।। २६ ।।

*३.३.७ सम्बन्धाधिकरणम्

भास्वद्बृषीकासनयोरुपास्याभेदात् अभेदात् उभयाह्वये द्वे ।

न रूपभेदात् स्थलजात् विभिन्ने व्यवस्थितैकाह्वयने यथाक्रमम् ।। २७ ।।

*३.३.८ संभृत्यधिकरणम्

किञ्चिन्नारभ्योक्तेः द्युव्याप्तः संभृतिश्च वीर्याणाम् ।

सर्वास्विति तु न यस्मात् द्युव्याप्तिर्नाल्पदेशसंग्राह्या ।। २८ ।।

*३.३.९ पुरुषविद्याधिकरणम्

विद्याभेदः सत्यपि संज्ञैक्ये पुरुषविद्येति ।

सवनादि यज्ञ संपरिकल्पन भेदकृतरूपभेदत्वात् ।। २९ ।।

*३.३.१० वेधाद्यधिकरणम्

'शं नो मित्रे'त्याद्या मन्त्रा विद्याङ्गं अन्तिकामननात् ।

न हि, शुक्रादिकमन्त्रवदध्ययनाङ्गं तथैव सार्मथ्यात् ।। ३० ।।

*३.३.११ हान्यधिकरणम्

पुण्यादिहान्युपायन एकं चिन्त्यं समुच्चितं वेह ।

पृगाम्नानफलत्वात् नैतत् सापेक्षतः परस्परतः ।। ३१ ।।

*३.३.१२ साम्परायाधिकरणम्

पुण्यादिहानिचिन्ता गत्युपपत्तेः मृतौ च मार्गे च ।

कार्येति नैव मरणे कर्तव्या तावदित्युक्तेः ।। ३२ ।।

*३.३.१३ अनियमाधिकरणम्

तद्विद्यानिष्ठानां तद्विद्योक्तार्चिरादिगतिचिन्ता स्यात् ।

प्रकरणभेदान्नैतत् तद्य इति तु समानतावचनात् ।। ३३ ।।

*३.३.१४ अक्षरध्यधिकरणम्

विद्याविशेषकथितास्त्वस्थूलाद्या भवन्ति तत्रैव ।

नान्यत्र मानहानेः नैवानन्दादिवन्निरूपकतः ।। ३४ ।।

*३.३.१५ अन्तरत्वाधिकरणम्

प्रष्ट्रोर्भेदोऽपि तथा व्यतिहारः प्राणनाशनायाद्योः ।

वाक्यं सद्विद्यावत् 'यत् साक्षात्' इति समानतः प्रश्ने ।। ३५ ।।

*३.३.१६ कामाद्यधिकरणम्

आकाशतच्छयानौ समुपास्यौ यदि न दहरविद्यैका ।

सामान्यात्तु गुणानां क्वचिदाकाशस्य हृदयवाचित्वात् ।। ३६ ।।

*३.३.१७ तन्निर्धारणानियमाधिकरणम्

उद्गीथस्योपास्तिः नियता स्यात् अङ्गवत्तदाश्रयतः ।

अनियमनमर्थवत्त्वात् अनुपासितुरपि च कर्मिताहेतोः ।। ३७ ।।

*३.३.१८ प्रदानाधिकरणम्

साधारणत्वहेतोः गुणी तु गुणचिन्तनेषु नार्वत्यः ।

नैवं विशिष्टभेदात् प्रतिगुणमावर्तनीय एव गुणी ।। ३८ ।।

*३.३.१९ लिङ्गभूयस्त्वाधिकरणम्

पूर्वानुवाकनीत्या दहरोपास्ति समुपास्यनिर्णयनम् ।

प्रकृतत्वादिति नैवं स्ववाक्यबलतः समस्तनिर्णयनम् ।। ३९ ।।

*३.३.२० पूर्वविकल्पाधिकरणम्

अविधेयः स्वस्य विधौ च क्रियामयेष्टकचितादिवह्नीनाम् ।

वाक्यात् कल्प्यविधित्वात् विद्यामय्यो मनश्चिताद्याः स्युः ।। ४० ।।

*३.३.२१ शरीरे भावाधिकरणम्

कर्तृत्वादिविशिष्टो जीवो ध्येयः शरीरिताहेतोः ।

नैवं गुणाष्टकयुतः प्राप्यत्वात् स्यात् यथाक्रतुन्यायात् ।। ४१ ।।

*३.३.२२ अङ्गावबद्धाधिकरणम्

उद्गीथस्योपास्तिः नियता स्वास्वेव नेतरास्वमितेः ।

नैवं शंक्यमुपास्तेः केवलमुद्गीथमात्र विषयत्वात् ।। ४२ ।।

*३.३.२३ भूमज्यायस्त्वाधिकरणम्

उभयत्र फलसमुक्तेः व्यस्तो व्यस्तस्समस्तो वा ।

वैश्वानरो विचिन्त्यः नैव निषेधात् समस्त एव स्यात् ।। ४३ ।।

*३.३.२४ शब्दादिभेदाधिकरणम्

फलचोदनाद्यभेदात् एकत्वं स्यात् सदादिविद्यानाम् ।

नैवं संज्ञारूपप्रभेदतो भिन्नतैव स्यात् ।। ४४ ।।

*३.३.२५ विकल्पाधिकरणम्

ब्रह्मानुभूत्यपेक्षा बाहुल्यात् स्यात् सदादिविद्यानाम् ।

एकत्रैव समुच्चितिरिति नैव फलस्य सर्वथैवैक्यात् ।। ४५ ।।

*३.३.२६ यथाश्रयभावाधिकरणम्

उद्गीथाद्यनुचिन्तननियमाभावस्तु नैव पूर्वोक्तः ।

अफलत्वतः स्ववाक्ये नैव तथाश्रयविधेः फलित्वाच्च ।। ४६ ।।

**अ-३,पा-३ पादसंग्रहः -१

विद्यैक्यं उद्गीथभिदा प्राणोपास्त्येकता तथा ।

आनन्दादिसमाहारः प्राणवासस्त्व चोदनम् ।। ४७ ।।

**अ-३,पा-३ पादसंग्रहः -२

शाण्डिल्यैक्यं व्यवस्था च नाम्नोः द्युव्यापनस्य च ।

विभेदः पुरुषोपास्तेः वेदाद्यध्ययनाङ्गता ।। ४८ ।।

**अ-३,पा-३ पादसंग्रहः -३

हानाद्यन्योन्यसम्बन्धः कालस्तच्चिन्तनाविधेः ।

साधारण्यं सरण्याश्च तथाऽस्थूलादिसाम्यता ।। ४९ ।।

**अ-३,पा-३ पादसंग्रहः -४

प्राणाशनायाद्येकत्वं ततश्च दहरैकता ।

उद्गीथोपास्त्यनियमो गुण्यावृत्त्यनुचिन्तनम् ।। ५० ।।

**अ-३,पा-३ पादसंग्रहः -५

सर्वोपास्यविनिर्णीतिः विद्यात्वं च मनश्चिताम् ।

जीवस्य गुणितोपास्तिः सर्वत्रोद्गीथचिन्तनम् ।। ५१ ।।

**अ-३,पा-३ पादसंग्रहः -६

वैश्वानरस्य सामस्त्यं सद्विद्यादेर्विभिन्नता ।

विद्यानामसमाहारः उद्गीथाऽनियतिः पुनः ।। ५२ ।।

**अ-३,पा-३ पादसंग्रहः -७

भेदाभेदौ च विद्यानां गुणानां च ग्रहाग्रहौ ।

इत्थमेतेन पादेन साधिष्ठं परिचिन्तितम् ।। ५३ ।।

चतुर्था पादः

*3.4.1 पुरुषार्थाधिकरणम्

कर्माङ्गत्वात् कर्तृनिर्णायिकायाः विद्यायास्तत्कर्म दत्ते फलानि ।
नैतज्जीवाधीश निर्णायकत्वात् विद्या दत्ते कर्म चाङ्गं त्वमुष्याः ।। ५४ ।।

*3.4.2 स्तुतिमात्राधिकरणम्

कर्माङ्गोद्गीथादिसंबन्धमात्रं दृष्टं यस्मात् तत्स्तुतित्वं रसादेः ।
नासान्निध्यात् तद्विधेयप्रकर्षात् अप्राप्तत्वाच्चात्र कल्प्यो
विधिः स्यात् ।। ५५ ।।

*3.4.3 पारिप्लवाधिकरणम्

प्रतर्दनाद्यास्तु विशेषसंज्ञाः पारिप्लवार्था विनियोगहेतोः ।
विद्याविधार्थास्तु तदैकवाक्यात् मन्वादिसंज्ञा चरितार्थनाच्च ।। ५६ ।।

*3.4.4 अग्नीन्धनाद्यधिकरणम्

विद्यास्तु यज्ञादितदङ्गहानेः प्रव्राजकानां न हि संभवन्ति ।
नैतत्, 'यदिच्छन्त' इति श्रुतत्वात् अग्न्याद्यपेक्षारहितैव साऽस्ति ।। ५७ ।।

*3.4.5 सर्वापेक्षाधिकरणम्

साधारणत्वात् गृहमेधिनां च प्रव्राजिवत् सा तु तदङ्गहीना ।
नैवं तु यज्ञादिक वाक्यभावात् सर्वत्र च स्वाश्रमधर्मवत्त्वात् ।। ५८ ।।

*3.4.6 शमदमाद्यधिकरणम्

व्यापारकर्माधिकृतत्वहेतोः तेषां तु विद्या न शमादियुक्ता ।
नैतत् शमादेस्तु तदङ्गभावात् द्वयोस्तयोः भिन्ननिबन्धनत्वात् ।। ५९ ।।

*3.4.7 सर्वान्नानुमत्यधिकरणम्

सर्वान्नभुक्तिस्तु विशेषहानेः स्यात् सर्वदा प्राणविदां इतीदम् ।
न शोभते शक्तिविशेषभाजः प्राणात्यये ब्रह्मविदोऽपि दृष्टेः ।। ६० ।।

*3.4.8 विहितत्वाधिकरणम्

विद्याविहीनाश्रमकर्मभूता यज्ञादयो नैव विरोधभावात् ।
नित्यं तदन्यच्च फलं कथं स्यात् नैतत्प्रसङ्गो विनियोगभेदात् ।। ६१ ।।

*3.4.9 विधुराधिकरणम्

यज्ञादिकर्माङ्गकलापहानेः विद्याधिकारो न निराश्रमाणाम् ।
तन्नैव रैक्वादिषु लक्षितत्वात् जपोपवासाद्युपकारतश्च ।। ६२ ।।

*3.4.10 तद्भूताधिकरणम्

जपोपवासाद्यनुमोदभावात् विद्याधिकारो विपरिच्युतानाम् ।
नैतत् स्मृतेः तत्परिहारहानौ सन्दर्शनात् शिष्टबहिष्कृतेश्च ।। ६३ ।।

*3.4.11 स्वाम्यधिकरणम्

क्रत्वङ्गसंबन्धमुपासनं यत् तत्स्वामिनः तत्फलभोक्तृभावात् ।
नैवर्त्विजां कर्म तदङ्गवत् स्यात् कर्माङ्गसंबन्धत एव हेतोः ।। ६४ ।।

*3.4.12 सहकार्यन्तराधिकरणम्

मन्तव्य इत्येव विधानहेतोः अनूद्यते मौनं इति त्वसत् स्यात् ।
मौनं प्रकृष्टे मनने हि लोके प्रसिद्ध्यते तेन विधेयमेतत् ।। ६५ ।।

*3.4.13 अनाविष्काराधिकरणम्

विधेयहानेः विदुषस्तु बाल्यं सर्वं च कामाचरणादि, नैतत् ।
विशेषतो 'नाविरता'दिवाक्यैः बाल्यं त्वनाविष्करणं कुलादेः ।। ६६ ।।

*3.4.14 ऐहिकाधिकरणम्

यज्ञादिकं त्वभ्युदयादिहेतुः सद्यः फलं स्यात् अविलम्बहेतोः ।
न तत् बलिष्ठैः प्रतिबन्धहानौ तत् स्यात् 'यदेवे'ति तु चोदितत्वात् ।। ६७ ।।

*3.4.15 मुक्तिफलाधिकरणम्

निःश्रेयसैकार्थं उपास्तिकर्म सद्यः फलं स्यात् प्रबलत्वहेतोः ।
तच्चापि न ब्रह्मविदग्रिमाणां निन्दादिकस्यातिबलोत्तरत्वात् ।। ६८ ।।

**अ-३,पा-४ पादसंग्रहः -१

विद्यायाः फलदातृत्वं रसादेश्च विधेयता ।

विद्याङ्गता च यज्ञानां विद्या प्रव्राजिनां तथा ।। ६९ ।।

**अ-३,पा-४ पादसंग्रहः -२

गृहस्थानां च विद्याया यज्ञादिप्रत्यवेक्षणम् ।

तेषां शमाद्यपेक्षत्वं आहारस्य व्यवस्थितिः ।। ७० ।।

**अ-३,पा-४ पादसंग्रहः -३

गार्हस्थ्यापि कर्मत्वं यज्ञादेः कर्मणः तथा ।

विधुराणां अधिकृतिः च्युतानां तद्विहीनता ।। ७१ ।।

**अ-३,पा-४ पादसंग्रहः -४

क्रत्वङ्गोपासने ऋत्विक्कार्यता मौनितावधिः ।

बाल्यं त्वस्याप्रकाशत्वं शक्ति विद्याभिजन्मनाम् ।। ७२ ।।

**अ-३,पा-४ पादसंग्रहः -५

प्रतिबन्धे विलम्बित्वं स्वर्गमोक्षार्थकर्मणोः ।

इत्यनेनेतिकर्तव्यसंहतिः परिचिन्तिता ।। ७३ ।।

चतुर्थोऽध्यायः

प्रथम पादः

*4.1.1 आवृत्त्यधिकरणम्

ज्ञानस्योपायत्वात् तस्य च सकृदेव कर्तुमर्हत्वात् ।

सकृदेव वेदनं स्यात् नैतदुपास्तित्वचोदनात् ज्ञप्तेः ।। १ ।।

*4.1.2 आत्मत्वोपासनाधिकरणम्

स्वस्मात् विभेदेन परो ह्युपास्यः भेदस्य सर्वत्र समर्थितत्वात् ।

नैवाहमित्यात्मतया ह्युपास्यः 'त्वं वे'ति शब्दाच्च तदात्मतश्च ।। २ ।।

*4.1.3 प्रतीकाधिकरणम्

तथा प्रतीकेषु यथेतरेषु यस्मात् परोपासनताऽविशिष्टा ।

तन्नैव शंक्यं, परमात्मदृष्ट्या नामादिकानां समुपास्यभावात् ।। ३ ।।

*4.1.4 आदित्यादिमत्यधिकरणम्

उद्गीथदृष्टिस्तपने तु नीचे श्रेष्ठं हि कर्मैव फलप्रदत्वात् ।

तन्नैव तस्यापि फलप्रदत्वं तत्पूजनत्वादिति नान्यथा स्यात् ।। ४ ।।

*4.1.5 आसीनाधिकरणम्

आसीन इत्येव विशेषहानेः सर्वप्रवृत्तिष्वपि सा विधेया ।
स्यान्नैवमैकाग्र्यविशेषभावात् ध्यानश्रुतेश्चोपनिषेदुषः सा ।। ५ ।।

*4.1.6 आप्रयाणाधिकरणम्

शास्त्रार्थनिर्वृत्तित एव हेतोः कर्तव्यमेकत्र तु वासरे तत् ।
एतन्न संसिद्ध्यति 'यावदायुः' इत्येव शब्दात् विधितश्च तस्य ।। ६ ।।

*4.1.7 तदधिगमाधिकरणम्

'नाभुक्तं' इत्येव तु संस्मृतत्वात् अश्लेषनाशौ न हि पातकानाम् ।
तस्याः फलित्वैकसमर्थनत्वात् 'एवं विदी'ति श्रवणाच्च नैवम् ।। ७ ।।

*4.1.8 इतराधिकरणम्

अश्लेषनाशौ हितकर्मणां तु नैव प्रसक्तौ सुखलाभहेतोः ।
तन्नैव मोक्षप्रतिबन्धकत्वसाम्यान्मुमुक्षोः स्फुटतः प्रसक्तौ ।। ८ ।।

*4.1.9 अनारब्धकार्याधिकरणम्

सर्वस्य वैशेषिकशब्दहानेः अश्लेषनाशौ भवतो हि तस्य ।
नारब्धकार्यस्य हि नैव यस्मात् 'यावन्न मोक्ष्ये'ति विशेषशब्दः ।। ९ ।।

*4.1.10 अग्निहोत्राद्यधिकरणम्

अश्लेषनाशश्रवणात् कृतानां अकार्यता स्वाश्रमकर्मणां च ।
नैतत्तु कार्यं खलु 'यज्ञ'शब्दात् विद्यासमुत्पादनशक्तितश्च ।। १० ।।

*4.1.11 इतरक्षपणाधिकरणम्

'यावन्न मोक्ष्ये'ति विशेषशब्दात् आरभ्यमाणस्य फलं च कर्म ।
तद्देहपातावधिकं न चैतत् तस्याः श्रुतेः तत्फलगोचरत्वात् ।। ११ ।।

**अ-४,पा-१ पादसंग्रहः -१

असकृत् कार्यतोपास्तेः अहमित्यप्युपास्यता ।
प्रतीकेष्वन्यथोपास्तिः अङ्गेष्वर्कादिदृष्टयः ।। १२ ।।

**अ-४,पा-१ पादसंग्रहः -२

उपास्तेरासनाङ्गत्वं प्रत्यहं चाप्युपास्यता ।
अघस्याश्लेषनाशौ च पुण्यस्यापि तथा भवः ।। १३ ।।

**अ-४,पा-१ पादसंग्रहः -३

आरब्धस्य फलित्वं च कार्यताऽऽश्रमकर्मणाम् ।

कर्मावधित्वं बन्धस्य पादेनानेन साधितम् ।। १४ ।।

द्वितीय पादः

*4.2.1 वागधिकरणम्

वाचो मनः कारणकत्वहानेः वृत्तेर्लयश्चेतसि नैव वाचः ।
तन्नैव तस्याश्च समानभावात् वाक्छब्दतः सङ्गतिमात्रतश्च ।। १५ ।।

*4.2.2 मनोधिकरणम्

प्राणोऽम्बु तेजः प्रकृतित्वयोगात् 'आपोमयः प्राणः' इति श्रुतेश्च ।
न स्यादहङ्कारकृतं तु चित्तं प्राणो नभः कार्यमतः स एव ।। १६ ।।

*4.2.3 अध्यक्षाधिकरणम्

प्राणो भवेत् तेजसि योगभागी तथैव शब्दश्रवणात् इतीदम् ।
न स्यात्तु जीवोपगमादिशब्दात् प्राणस्य, तेजः श्रवणं तु पश्चात् ।। १७ ।।

*4.2.4 भूताधिकरणम्

तेजस्तु 'तत्तेज' इति श्रुतत्वात् तन्मात्रमेवान्यवियुक्तरूपम् ।
न स्यात् तु भूतान्तरसंप्रविष्टं त्रिवृत्कृतत्व श्रवणादशक्तेः ।। १८ ।।

*4.2.5 आसृत्युपक्रमाधिकरणम्

एषा त्वविद्यस्य गतिर्भवित्री विद्यावतोऽत्रैव पराप्तिशब्दात् ।
नैतत् द्वयं स्यात् उभयोः समाना गतिः शरीरात् इतरोऽर्थवादः ।। १९ ।।

*4.2.6 परसंपत्त्यधिकरणम्

भोगाद्यभावेन निरर्थकत्वात् यथायथं स्युर्न तु देवतायाम् ।
संयन्ति तानीति न शंक्यमेतत् 'तेजः परस्यां' इति चोदितत्वात् ।। २० ।।

*4.2.7 अविभागाधिकरणम्

तेषां त्रयाणां तु परत्र पुंसि स्वकारणत्वात् प्रलयस्तु भावी ।
तन्नैव पूर्वैः स्फुटमेकवाक्यात् संश्लेषमात्रं तदबाधतश्च ।। २१ ।।

*4.2.8 तदोकोधिकरणम्

मूर्धाऽन्यनाडीभिरिति व्यवस्था न सौक्ष्म्यतः संभवशंसि वाक्यम् ।
तन्नैव विद्यामहिमातिरेकात् परप्रसत्तेश्च तथैव यानम् ।। २२ ।।

*4.2.9 रश्म्यनुसाराधिकरणम्

निशामृतौ रश्म्यनुसारवारणे नैव व्यवस्था किरणानुसारे ।
न तद्व्यवस्थैव भवेन्निशीथेऽप्यौष्ण्योपलब्धेः यदमी हि सन्ति ।। २३ ।।

*4.2.10 निशाधिकरणम्

दिवा मृतस्यैव परोपसत्तिः विगर्हितत्वान्मरणस्य रात्रौ ।
न स्यादिदं बन्धककर्महानात् विद्याबलात् तां वदति श्रुतिश्च ।। २४ ।।

*4.2.11 दक्षिणायनाधिकरणम्

मृतस्य मुक्तिर्न हि दक्षिणायने शशाङ्कसायुज्यं अमुष्य हि श्रुतम् ।
न तत्तु विद्या महिमातिरेकतः श्रुतिस्तु सा विश्रमभूमिगोचरा ।। २५ ।।

**अ-४,पा-२ पादसंग्रहः -१

वाक् तु चेतसि तत् प्राणे तत् पुनर्जीवचेतसोः (तेजसोः) ।
तेजसश्चेतरश्लेषः तावन्मात्रस्य तुल्यता ।। २६ ।।

**अ-४,पा-२ पादसंग्रहः -२

तेषां परस्मिन् गमनं तस्य च श्लेषमात्रता ।
मूर्धन्यनाडीनियमो रश्मिनेति व्यवस्थितिः ।। २७ ।।

**अ-४,पा-२ पादसंग्रहः -३

निशायां चापि सन्मोक्षो मोक्षणं दक्षिणायने ।
इत्येतत् सर्वं एतेन पादेनात्र विचिन्तितम् ।। २८ ।।

तृतीय पादः

तृतीय पादः

*4.3.1 अर्चिराद्यधिकरणम्

शाखासु बहुविधत्वात् गतिश्रुतेरर्चिरादिनियमो न ।
तन्नैव नियमनं स्यात् सर्वत्रार्कादि चिह्नसंभवतः ।। २९ ।।

*4.3.2 वाय्वधिकरणम्

वायुश्च देवलोकः शब्दविभेदात् पृथग्भवतः ।
न स्यात् 'योऽयं पवते स देवलोकः' इति तद्विशेषणतः ।। ३० ।।

*4.3.3 वरुणाधिकरणम्

श्रुतिभङ्गेऽप्यगतित्वात् पाठात् वायोः परे तु वरुणाद्याः ।
तन्नार्थवशाद्वरुणः तटितः स्यात् उपरि तदुपरीन्द्राद्याः ।। ३१ ।।

*4.3.4 आतिवाहिकाधिकरणम्

उपदेशस्य तथात्वात् चिह्नानि त्वर्चिरादयः सरणेः ।

नैतत् गमयितृशब्दात् उपरि परेऽप्यातिवाहिका हि स्युः ।। ३२ ।।

*4.3.5 कार्याधिकरणम्

चतुर्मुखमुपासितुः गतिरियं स हि प्राप्यते परस्य
परिपूर्णतः सततमेव संप्राप्तितः ।
न तत्परमुपासितुः श्रुतित एव तच्चाप्यसत् परं तदनुजीवमप्युभयतः
श्रुतेर्दर्शनात् ।। ३३ ।।

**अ-४,पा-३ पादसंग्रहः -१

अर्चिरादेस्तु नियमो वायोः स्वर्गस्य चैकता ।
तटितो वरुणप्राप्तिः आतिवाहिकता ततः ।। ३४ ।।

**अ-४,पा-३ पादसंग्रहः -२

फलं जीवपरोपास्त्योः अर्चिरादिगतिस्त्विय्म् ।
इति सर्वमनेनैव पादेन परिचिन्तितम् ।। ३५ ।।

चतुर्था पादः

*4.4.1 संपद्याविर्भावाधिकरणम्

नित्योपलब्धेरसुखत्वतश्च केनापि रूपेण सुखैकभाजा ।
मुक्तस्य संबन्ध इति त्वसत् स्यात् स्वेनेति शब्दात् अतिरोहितत्वात् ।। ३६ ।।

*4.4.2 अविभागेनदृष्टत्वाधिकरणम्

परानुभूतिस्तु विभेदतः स्यात् साधर्म्यशब्दादतिसाम्यशब्दात् ।
न स्यादिदं नाम तदात्मकत्वात् साम्यश्रुतिस्तद्गुणसाम्यलम्बा ।। ३७ ।।

*4.4.3 ब्राह्माधिकरणम्

मुक्तस्वरूपं तु गुणाष्टकं स्यात् तथा श्रुतत्वात् द्युतिमात्रता वा ।
तस्यैव विज्ञानघनत्वशब्दात् तन्नोभयं स्यात् उभयाविरोधात् ।। ३८ ।।

*4.4.4 संकल्पाधिकरणम्

मुक्तस्य पित्रादि तु सप्रयत्नात् सङ्कल्पतो भावि तथैव दृष्टेः ।
ब्रह्मादिकेष्वित्यसदेतत् एषां सङ्कल्पसत्यत्वावियोगतः स्यात् ।। ३९ ।।

*4.4.5 अभावाधिकरणम्

मुक्तोऽशरीरस्त्वशरीरशब्दात् इच्छाशरीरी 'बहुधा' इति शब्दात् ।
नैषा व्यवस्था 'बहुधा' तु शब्दात् बहुश्रुतेश्च त्वयमैच्छिकः स्यात् ।। ४० ।।

*4.4.6 जगद्व्यापारवर्जाधिकरणम्

मुक्तस्य भोगः खलु साम्यशब्दात् निर्वोढृता स्यात् भुवनस्य तद्वत् ।
नैतत् परस्यैव तथात्वशब्दात् भोगोनुभूतिः सगुणस्य तस्य ।। ४१ ।।

**अ-४,पा-४ पादसंग्रहः -१

आविर्भवत्स्वरूपत्वं परानुभवरूपणम् ।
मुक्तस्वरूपनिष्कर्षः सत्यसङ्कल्पता तथा ।। ४२ ।।

**अ-४,पा-४ पादसंग्रहः -२

स्वेच्छया सर्वसंभोगः मोक्षस्य च फलोदयः ।
इत्येवमर्थजातं स्यात् पादेनानेन चिन्तितम् ।। ४३ ।।